श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीचक्रपाण्यष्टकं ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीचक्रपाण्यष्टकं ॥

सतोयतोयदालिनीलदिव्यविग्रहोपरि
स्फुरद्धिरण्यकान्तिजालशोभिपीतवाससे।
किरीटरत्नरोचिषा विनिर्जितोष्णरश्मये
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ १ ॥

ललामशोभितत्तदङ्गसौभगात्ममूर्तये
ललाटगोर्ध्वपुण्ड्रकान्तिधूतपातकालये।
प्रफुल्लरत्नवारिरुट्छदायतात्मचक्षुषे
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ २ ॥

अनर्घरत्नदीप्तपुञ्जहैमकुण्डलित्विषा
धगद्धगायमाननैजगण्डयुग्मशोभिने।
अमन्दशीतमन्दहासनिर्जितामृतांशवे
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ ३ ॥

प्रशस्तकम्बुकन्धरप्रलम्बिकौस्तुभोल्लसद्-
बृहद्विशालवक्षसि स्थितेन्दिराविभूतये।
भुजङ्गराजभोगदीर्घभूषणाढ्यबाहवे
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ ४ ॥

समस्तजीवसन्तताण्डकोटिपूर्णकुक्षये
सदन्तरङ्गरत्नपीठवासिनेऽमलात्मने।
खगाधिराजवाहनस्थिताय शेषशायिने
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ ५ ॥

अशेषभूतभौतिकादिविश्वसृष्टिशक्तिमद्-
विधातृजन्मभूमिभूतनाभिपङ्कजश्रिये।

समस्तवेदसन्नुतप्रभावयुङ्निजाङ्घ्रये
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ ६ ॥

दशाननाद्यनेकदुष्टनिग्रहार्थमादराद्
गृहीतरामकृष्णपूर्वदिव्यमूर्तिकोटये।
गजेन्द्रपूर्वनैजभक्तपालनैकदृष्टये
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ ७ ॥

अमायिकस्वरूपभूतपारमार्थिकाश्रया-
दखण्डसच्चिदात्मकस्वरूपमात्रशोभिने।
अथापि तत्तदुत्सवाय तत्तदात्मकाय ते
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ ८ ॥

चक्रपाण्यष्टकस्तोत्रमिदं भक्त्यैव यः पठेत्।
विपच्चक्रान्न तस्यास्ति भयलेशोऽपि सर्वदा॥ ९ ॥

॥ इति श्रीचक्रपाण्यष्टकं समाप्तम्॥